

# ई.एल्.थार्नडक-यत्नदोषसिद्धान्तः

## EDWARD L. THORNDIKE TRIAL AND ERROR METHOD




चित्र- प्रयत्न और भूल का सिद्धान्त

# थार्नडैकमहोदयस्य सम्बन्धवादसिद्धान्तः
## THORNDIKE'S CONNECTIONISM THEORY



## ई.एल्.थार्नडैकः

**जननम्** – 31 अगस्त 1874
**मरणम्** – 9 अगस्त 1949
कृतयः –

1. एडूकेशनल साइकॉलजी (१९०३),
2. एनीमल इंटेलीजेंस (१८९८),
3. द साइकालजी ऑव लर्निंग (१९१४),
4. द मेजरमेंट ऑव इंटेलीजेंस" (१९२६),
5. फंडामेंटल्स ऑव लर्निंग (१९३३),
6. ह्यूमन नेचर ऐंड द सोशल आर्डर" (१९४०)

**परिचयः –**

- अमेरिकादेशीयः मनोवैज्ञानिकः आसीत्। सः कैलिफोर्निया विश्वविद्यालयसम्बद्ध-शिक्षक महाविद्यालये एव अधिकसमयम् अयापयत्।
- पशुव्यवहारे अधिगमप्रक्रियायां च महत्त्वपूर्णं कार्यमकरोत्।
- मानसिक व्यवहार, थकान और पठनक्षमता तथा अन्य कारकों की परीक्षणविधियों के अविष्कार में महत्वपूर्ण योगदान किया। थार्नडाइक ने प्रौढ़शिक्षा अभियान को एक नया और वैज्ञानिक रूप प्रदान किया। मनोवैज्ञानिक परीक्षण की अपनी विधियों द्वारा उसने सीखने की क्षमता और पूर्वार्जित ज्ञान मे भेद स्पष्ट किया।



Dr B V L Narayana

# सम्बन्धवादः (CONNECTIONISM THEORY)

- **अयं महोदयः सम्बन्धवादस्य सिद्धान्तस्य उद्घोषणा विहिता।**
- **अनेन सिद्धान्तेन अधिगमः उद्दीपकानुक्रियायाः परिणामं भवति।**
- यदा जीवस्य पुरतः किमपि उद्दीपको (Stimulus) भवति तदा प्रतिक्रिया (Response) भवति।
- प्रतिक्रियया जीवः सन्तुष्टो भवति चेत् उद्दीपक(S)-प्रतिक्रिययोः (R) मध्ये सम्बन्धो जायते।
- एवं उद्दीपक-प्रतक्रिययोः सम्बन्ध एव अधिगमः इत्युच्यते।
- जीवः यत्नदोषैरेव उद्दीपक-प्रतिक्रिययोः सम्बन्धं ज्ञात्वा क्रमिकाधिगमं प्राप्नोति। इत्थम् उद्दीपक-प्रतिक्रिययोः सम्बन्धेन अधिगमः जायते इति हेतोः सिद्धन्तोऽयं सम्बन्धवादसिद्धान्तः ( Theory of Connectionism) इति व्यवहारः।

# अधिगमस्य नियमाः

- थार्नडैकमहोदयेन त्रयः अधिगमनियमाः प्रतिपादिताः।



संसिद्धतानियमः (The Law of Readiness)



फलितनियमः (The Law of Effect)



अभ्यासनियमः (The Law of Excercise)

# सम्बन्धवादसिद्धान्तः (CONNECTIONISM THEORY)

## अधिगमस्य नियमाः

## संसिद्धतानियमः

- ✓ संसिद्धतायाः अभिप्रायो भवति कार्यस्य सन्नाहः। कार्यस्य प्रवृत्तेः परिसूचको भवति।
- ✓अधिगमप्रक्रियायाम् अध्येतुः मानसिकस्थितिं वर्णयति।
- ✓ अधिगमे रुचिः भवति चेत् साफल्यस्य सम्भावना भवति।
- ✓यदि बालकः किमपि कार्यं कर्तुं नेच्छति तर्हि बलात् तत्कार्यार्थम् आदेशः न करणीयः। बालः स्वेच्छया किमपि कर्तुं अधिगन्तुमिच्छति तर्हि अल्पेनैव प्रयत्नेन तत् साधयितुं शक्नोति।
- ✓अतः सिद्धन्तोऽयं अधिगमप्रक्रियायाम् अध्येतुः अभिरुचेः, इच्छायाः, अभिप्रेरणायाः च महत्त्वं प्रतिपादयति।


Dr B V L Narayana

# सम्बन्धवादसिद्धान्तः (CONNECTIONISM THEORY)

## अधिगमस्य नियमाः

## फलितनियमः

- ✓ उद्दीपक-प्रतिक्रिययोः मध्ये सम्बन्धः सन्तोषं जनयति चेत् तयोः सम्बन्धः दृढः भवति।
- ✓ यदि तयोः सम्बन्धः दुःखं जनयति तर्हि सम्बन्धः दुर्बलो भवति।
- ✓ शिक्षणाधिगमे सम्बन्धः सन्तोषजनकं भवेत् ।
- ✓ पुरस्कार-दण्डनञ्च अधिगमप्रक्रियायां महत्त्वं दृश्यते।
- ✓ परं पुरस्कारं दण्डनापेक्षया अधिगमाय प्रभावपूर्णं भवति।
- ✓ तेनैव उद्दीपन-प्रतिक्रिययोः सम्बन्धः दृढः भवति।
- ✓ थार्नडैकमहोदयः विश्वासः आसीत् पुरस्कारेन एव व्यवहारपरिवर्तनं भवतीति।

# सम्बन्धवादसिद्धान्तः (CONNECTIONISM THEORY)


## अधिगमस्य नियमाः

## अभ्यासनियमः

- ✓ अधिगमप्रक्रियायां पुनरावृत्तेः अथवा अभ्यासस्य महत्त्वम् अत्यन्तं दरीदृश्यते।
- ✓ अयं नियमः उपयोगानुपयोगरूपेण द्विधा स्वीकर्तुं शक्यते।
- ✓ अधीतविषयस्य उपयोगः/प्रयोगः क्रियते तदा एव अर्जितकौशलं मनसि सुस्थिरं तिष्ठति।
- ✓ अधीतविषयस्य अनुप्रयोगः क्रियते चेत् अर्जितं ज्ञानं स्मरणे न तिष्ठति।
- ✓अर्थात् अभ्यासाभावे उद्दीपक-प्रतिक्रिययोः सम्बन्धः क्रमशः शिथिलो भवति।

# सम्बन्धवादसिद्धान्तः (CONNECTIONISM THEORY)

## प्रयोगः





थार्नडैकमहोदयः प्रयोगार्थं कश्चन बुभुक्षितं मार्जालं स्व्यकरोत्। प्रयोगार्थम् एका पेटिका (Puzzle-Box) सिद्धी कृता। तस्यां पेटिकायां बुभुक्षितं मार्जालं संस्थापितवान्। अन्तः द्वारमुद्धाटयितुम् एकः पिञ्जः वर्तते। यदि पिञ्जस्य नोदनं क्रियते द्वारमुद्धाटितो भवति।

मार्जालस्य दृष्टिपथे पेटिकायाः बहिः आहारः स्थापितः। मार्जालः आहारं दृष्ट्वा बहिरान्तुं प्रययते। सः उथ्पतन-धावनादिक्रियाः कृत्वा विफलो भवति। एवं बहुप्रयत्नानन्तरम् अप्रयत्नेन पिञ्जस्यो पादः स्थापितः द्वारमुद्धाटितम्। मार्जालः आहरं प्राप्य सन्तुष्टः अभवत्।

# सम्बन्धवादसिद्धान्तः (CONNECTIONISM THEORY)

## प्रयोगः




थार्नडैकमहोदयः पुनरेकवारम् बुभुक्षितं मार्जालं संस्थापितवान्। यथावत् प्रेटिकायाः पुरतः आहरं स्थापितवान्। अस्मिन् पर्याये विविधक्रियाः कृत्वा पूर्वतनापेक्षया अल्पे समये एव पिञ्जं नुदित्वा बहिरागतः। सन्तुष्टेन आहरमकादत्।

एवं बहुवारं प्रयोगं कृते सति क्रमशः प्रयासानां संख्या न्यूना जायते। अन्तः मार्जालः आहरं दृष्ट्वा पेटियाः अन्तः विद्यमानं पिञ्जं नुदित्वा बहिरागच्छति। अनेन प्रयोगेण सः मार्जालस्य कृते पिञ्जनोदनक्रियां शिक्षितवान्।

# शिक्षणे तस्य उपादेयता

- कक्ष्याप्रकोष्ठे अधिगमाय अनुकूलवातावरणनिर्माणम्।
- अल्पबुद्धिमतां मन्दाधिगतृभ्यः लाभो भवति।
- अधिगमसन्दर्भे अभिप्रेरणायाः कृते अधिकं महत्त्वं प्रदेयम्।
- प्राप्तज्ञानस्य अभ्यासः कारणीयः।
- विविधपाठ्यसहगामिक्रियाः समायोज्य पुरस्कारप्रदानम्।
- कक्ष्याशिक्षणं सरलं रुचिरूपूर्वकं भवेत्।
- अधीतविषयाणां प्रयोगः नित्यजीवने कथं करणीयः इति प्रदर्शयेत्।
- प्राप्तज्ञानस्य कौशलानाम् अभ्यासार्थं व्यवस्था समुपकल्पनीया।
- समस्यानां समाधानाय मार्गनिर्देशनप्रदानम्.